# कौषीतकि-ब्राह्मणानुसारेण प्राणविद्याध्ययनम्।

**NEERAJA RAJAGOPAL**
Student, Department of Sanskrit, Sree Sankara College, Kalady.

भारतीयविचारधारायाः मूलस्रोतः वेदान्तापरनामधेया उपननिषत् भवति। तस्यां उपासनायाः भिन्नप्रकाराः प्रतिपादिताः। फलदातृत्वरूपभगवदुपासना , प्राणाद्युपाधिकापराः विद्याः उभयप्रकारतया उपनिषत्प्रतिपाद्याः लभ्यन्ते। तासु ऋग्वेदान्तर्गतासु कौषीतकीब्राह्मणोपनिषत्सु चतुर्षु अध्यायेषु प्रतिपादिताः विद्याः अत्रविचार्यन्ते।

कौषीतकीब्राह्मणोपनिषत्।

उपनिषदियं चतुर्ष्वध्यायेषु उपनिबद्धा महीयते। ब्रह्मसूत्रादि ग्रन्थेषु अस्याः वाक्यानि स्वीकृतानीति द्रष्टुं शक्यते। तृतीये साधनेऽध्याये प्रथमपादस्थ विद्याकर्मणोरिति तु प्रकृतत्वात्' इति सूत्रस्य भाष्ये शङ्करभगवद्पादैः 'ये वै केचिदस्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते गच्छन्ति। 'कौषीदक्युपनिषदः वाक्यमादाय व्याख्यातं भवति। तथा "साम्पराये तर्तव्याभावात् तथा ह्यन्ये " इति सूत्रेऽपि अस्याः पर्यङ्कविद्यामुपादाय विचारमुपस्थापयति। स एनं देवयानं पन्थानं आपद्य अग्निलोकमागच्छति विरजां नदीम् , तां मनसैवात्येति' तत्सुकृतदुष्कृते धुनुते इति तत्र निर्दिष्टं भवति। एवं समानुज माधव श्रीकण्ठवल्लभादिभिः आचार्यैः अपि अस्याः वाक्यानुद्धृत्य व्याख्यातानि।

बहुविद्यात्वेन प्रसिद्धासु विद्यासु पर्यङ्कविद्या बालाकिविद्या प्रतर्दनविद्या इति तिस्रः विद्याः आसु विचरिताः भवन्ति। प्राणविद्यायाः महत्वमपि अत्रावतिष्ठतेत्यवगन्तुं शक्यते । तथा कौषीतकि-पैङ्ग्य-शुष्क-भृङ्गारैः प्रधानतया दर्शिताः ,प्राणविद्यायाः महत्वमपि अत्रावतिष्ठतेत्यवगन्तुं शक्यते ।

अग्निहोत्रादीन्यश्वमेधान्तानि कर्माणि तैजसस्यान्तःकरणस्य शुद्धि हेतवो विविदिषासाधनत्वस्य श्रुतितोऽप्यवामात् , स्वर्गादेः कर्मफलस्य सुखविशेषरूपत्वात्तस्य

चान्तःकरणप्रसादापरपर्यायत्वात्कर्मिभिरपि कर्मणामन्तःकरणशुद्धिहेतुत्वमङ्गीकृतं यतस्ततस्तानि महता सन्दर्भेण प्रथमतोऽभिधायेदानीं ब्रह्मविद्यां वक्तुं लब्धावसरा श्रुतिः प्रववृत्ते। तत्र चित्रो ह वैगार्ग्यायणिरित्यादिका य एवं वेदेत्यन्ता चतुरध्यायी कौषीतकिब्राह्मणोपनिषत्। आद्येनाध्यायेन पर्यङ्कविद्यां सदक्षिणोत्तरमार्गान्तां द्वितीयेन प्राणविद्यां तद्विदश्च बाह्याध्यात्मिकानि कर्माणि फलविशेषसिद्धये तृतीयचतुर्थाभ्यां चाऽऽत्मविद्यामाह । यद्यपि प्रतर्दनो हेत्यादिकमेव प्रथमतः पठनीयं तथाऽपि शुद्धमप्यन्तःकरणं निर्गुणे ब्रह्मण्यभयेऽपि प्रथमतो ब्रह्मस्वभावमजानद्भयमाप्नुयात् । गर्भस्थप्रोषितपितृको युवेव सद्वृत्तस्थः प्रथमतः पितृदर्शने । ततोऽस्य भयनिरासार्थमुत्तरमार्गाप्यमेतल्लोकस्थ राजादिवद् ब्रह्मलोकस्थं सगुणं ब्रह्म प्रथमतः उक्तवती । तत्र च स आगच्छत्यमितौजसं पर्यङ्कम् । स प्राण इति प्राणस्य पर्यङ्कत्वं प्रथमेऽध्याय उक्तम् । तस्मिन्प्राणे भवति श्रोतृणां जिज्ञासा किमयं श्वासमात्रः प्राण आहोस्विद्विविधभूतिजुष्ट इति । अस्याः जिज्ञासायाः निवृत्त्यर्थं प्राणोपासनं द्वितीयेनाध्यायेनोपक्रान्तम् । तृतीयाध्याये प्रतर्द्दनविद्या निर्दिश्यते । इयं हि प्राणेन्दुशरीरकपरमात्मोपासनैवेति प्रकाशिकाकाराः वदन्ति । चतुर्थाध्याये बालाकिविद्या च प्रतिपादयति।

प्राणविद्या

कौषीतकिबाह्मणोपनिषदः अध्यायचतुष्टयेषु द्वितीयाध्यायो भवति प्राणविद्या, अस्यां विद्यायां प्राणस्य विचारः क्रियते । द्वितीयाध्यायेऽस्मिन् कानिचित्कर्माणि अग्निहोत्रप्रधानानि प्राणोपासनारूपाणि निर्दिष्टानि सन्ति।

" प्राणो ब्रह्मेति ह स्माह कौषीतकिस्तस्य ह वा एतस्य प्राणस्य ब्रह्मणो मनोदूतं वाक्परिवेष्ट्री चक्षुर्गोप्तृश्रोत्रं श्रावयित्य तस्मै वा एतस्मै प्राणाय ब्रह्मणे एताः सर्वाः देवताः अयाचमानाय बलिं हरन्ति य एवं वेद तस्योपनिषन्न याचेदिति तद्यथा ग्रामं भिक्षित्वा अलब्ध्वोपविशेन्नाहमतो दत्तमश्नीयामिति य एवैनां पुरस्तात् प्रत्याचक्षीरंस्त एवैनमुपमन्त्रयन्ते ददाम त इति । एष धर्मो याचितो भवति। अन्यतस्त्वेवैनम् उपमन्त्रयन्ते ददाम त इति। "

कौषीतकिमहर्षिः वदति प्राणैव ब्रह्मेति तमेव राजैवेति मत्वा वाचं तस्य पत्नीरूपत्वेण कल्पनीयम्। श्रोत्रं तु शब्दं श्रावयितुं नियोगितः द्वारपालकः । नेत्रं अंगरक्षकः । मनः च दूतः । सर्वेन्द्रियाः तेषां देवताभिः प्राणाय ब्रह्मणे अयाचमानायैव दत्तवन्तः उपहाराः भवन्ति। अतः यः एवं वेद ज्ञायते तस्मै सर्वाणि भूतानि अयाचमानैव बलिं हरन्ति । यथा याचकः एकं ग्रामं गत्वा भिक्षां याचनं कृत्वा तन्न प्राप्नोतीत्यतः निराशो भूत्वा ग्रामवासीनां अन्नादिभक्षणानि यस्मिन् प्रकारेण त्यजति तथैव प्राणोपासकः साधकः अपि अयाचमानतैव पावनकर्तव्यत्वेन स्वीक्रियते । साधकः स्वस्य निश्चये तप्तपरशुग्रहणवद् भवेत्।

एवमुक्त्वा पुनरपि प्राणोपासकस्य मनस्थैर्यं वर्णयति । प्राणोपासकस्य अभीष्टफलसिद्ध्यर्थं धनप्राप्त्यर्थं च तत्र यागादि कर्माणि निर्दिष्टानि । तस्याचरणविधिमपि प्रस्तौति। प्राणदेवता तस्मै प्राणोपासकाय धनं यच्छति। चक्षुषा देव्या तस्य कामनायाः पूर्तिः भूयते। श्रोत्रो देवी अभीष्टप्रदायिनी भवति । मनसो इन्द्रियः अपि प्राणोपासकाय धनं यच्छति । पुनः वाङ्मूलाद् लभ्यमाना फलसिद्धिं वदति। अनन्तरं दिवोदासपुत्रो प्रतर्द्दनो कृत संयमन अग्निहोत्रमधिकृत्य वदति।

" अथातः सायंमनं प्रातर्द्दनमान्तरमग्निहोत्रं इतिच आचक्षते यावद्वै पुरुषो भाषते न तावत् प्राणितुं शक्नोति प्राणं तदा वाचि जुहोति यावद्वै पुरुषो प्राणिति न तावद् भाषितुं शक्नोति वाचं तदा प्राणे जुहोति । एते अनन्ते अमृताहुती जाग्रच्च स्वप्नं सन्ततमव्यवच्छिन्नं जुहोत्यथ या अन्या भवन्ति एतद्ध वै पूर्वे विद्वासो अग्निहोत्रं न जुह्वां चक्रुः ॥ "

वाचः तथा प्राणहुतिः च कदापि न नश्यति। तौ नश्वरावेव। अतः जाग्रत् समये तथा निद्रायां जन्तवः आहुतिं जुहित्वैव जीवनीयं । प्राचीनज्ञाः एवं ज्ञातवन्तः । अत एव ते कर्ममयाहुतिम् प्राधान्यं न दत्तवन्तः

प्राणैव ब्रह्म। उक्थरूपो प्राणैव ऋगिति मत्वा उपासते। प्राणरूपं उक्थं ऋगिति यः ज्ञायते तं ज्ञानिनं महत्वं इच्छवः सर्वे प्राणिनः पूज्यन्ते । उक्थे यजुर्बुद्ध्या स्थीयमानं उपासकं उत्कर्षेच्छवः नमस्कुर्वन्ति । उक्थं श्रीभावेन उपासते । तस्मिन् यशोभावं अस्ति । तैजसरूपेणापि उपासनां कर्तुं

शक्नोति । एवं विधं रहस्यं यः धनुषः तेजोमय शक्तिसपन्तरूपतयेव ज्ञायते सः श्रेष्ठः यशस्वी तथा श्रीसम्पन्नो जायते।

त्रिसृणां वेदविद्यानां आत्मा अध्वर्यो प्राणैव इति यः प्राणं जानाति स स्वयं प्राणसमो भवति।

" स एष सर्वस्यै त्रयी विद्याया आत्मैष उ

एवाऽस्यात्मा एतदात्मा भवति य एवं वेद "।

अनन्तरं तत्र कौषीतकि महर्षेः त्रीणि अनुभूतोपासनानि वदति। प्रथमोपासनायाः फलत्वेन मानवानां मनःशुद्धिरेव वक्ष्यति । द्वितीयोपासना यः करोति तस्य पुत्रः अस्ति चेत् तस्य मरणस्य शेषमेव पुनमरणमिति फलम्। पुत्रहीनस्य च स्वर्गे श्रेष्ठ यशसि प्रतिष्ठानं फलम्।

इत्येवं प्रकारेण प्राणब्रह्मोपासनं तत्फलं च । पुनः दुर्लभार्थसाधकम् एकधनावरोधनकर्म । सर्वार्थसिद्धिसाधकं दैवं कर्म । प्राणब्रह्मप्रापकं अग्निहोत्रोपासम् । सर्वजयप्रदं अमावास्योपासनम् । प्रजामरणदुःखनिवारकं चन्द्रोपासनम् । पुत्रदीर्घायुः सम्पादकं कर्म । दैवपरिवरः निश्रेयसादानं नाम मुख्यप्राणविद्या । पुत्राभ्युदयफलं सम्प्रदानाख्यमुपासनम् इत्यादि विषयाः सन्ति । लौकिकफलसाधकानां अग्निहोत्रप्रधानानां प्राणोपासनानां कर्मणां ब्रह्मविद्यारूपत्वं न भवति , अतः उपनिषदन्तर्गतया एतेषां निरूपणमन्तःकरणविशुद्धिद्वारा ब्रह्मविद्यायोग्यतासाधकतया इति मन्तव्यम्।

तत्र तावत् , प्राणे ब्रह्मत्वबुद्ध्या क्रियमाणमुपासनमेकं कौषीतकि नामकेन ऋषिणा प्रवर्तितं प्रथमम्। द्वितीयं पुनरेकधननामकं पूर्णिमायाममावास्यां वा शुद्धनक्षत्रे क्रियमाणमग्न्युपासनं धनसाधकतयोपदिश्यते। अथ दैवस्मरो नाम लोकप्रियतासाधकं पर्वण्यग्निसाधनकं कर्म तृतीयम्। ततश्च संयमनं पातर्द्दनमिति अग्निहोत्र कर्म श्रेष्ठ्यापदकतया उपदिष्टम्। तदनु सर्वजित्कौषीतकेः त्रीण्युपासनानि जातपुत्राजातपुत्रक्षेमसाधकानि , जपप्रधानानि निरूपितानि आदित्यचन्द्रोपासनात्मकानि । अथ पुत्रायुः प्रार्थनात्मकमुपासनं मन्त्रानुष्ठानात्मकं समुपक्षिपति

उपनिषत् । दैवः परिमर इति अध्यात्ममधिदैवञ्च प्राणोपासनं शत्रुद्वेषाधिनिवारणफलकमुपदिश्यते। ततश्च निश्रेयसादानमिति अपरं कर्म निश्रेयसफलार्थिन उद्दिश्योच्यते। पितापुत्रीयमिति सम्प्रतिकर्म पुत्राभ्युदयसाधकं प्रतिपाद्यते । एवमेता उपासनाः लौकिक फलसाधिकाः सन्त्योऽपि परमप्रयोजनसाधनोपासना सोपानरूपेण निर्दिष्टा इति मन्तव्यम्।

प्राणविद्या - अन्यग्रन्थावलोकनम्।

प्राण एव जीवः। प्राणैव श्वासः , वायुः च। प्राणेन विना जीवनं कष्टमेव। अतः अस्य प्राणस्य ज्ञानं तथा पठनं च अतीव प्राधान्यमर्हति। योगदर्शनेऽपि प्राणचिन्तां प्राधान्यतया कल्पते। अष्टांगयोगेऽपि प्राणायामस्य वैशिष्ट्यं श्रद्धेयमस्ति। जनाः सदा सर्वदा प्राणं वशीकर्तुम् , तथा तस्य अवगमनाय च अत्यन्तं प्रयत्नं कुर्वन्ति। तैः प्राणस्य उपासना क्रियते। कौषीतकिब्राह्मणोपनिषदि द्वितीयाध्याये प्राणस्य विचारः एव क्रियते।

भगवद्गीतायां अपि प्राणचिन्तनं द्रष्टुं शक्यते -

" सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।

आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥ "

सर्वाणीन्द्रियकर्माणि - इन्द्रियाणां कर्माणि तथा प्राणकर्माणि - प्राणो वायुः आध्यात्मिकः तत् कर्माणि आकुञ्चनप्रसारणादीनि तानि च अपरे आत्मसंयमयोगाग्नौ - आत्मनि संयम आत्मसंयमः स एव योगाग्निः तस्मिन् आत्मसंयोगाग्नौ जुह्वति प्रक्षिपन्ति ज्ञानदीपिते स्नेहेन इव प्रदीपिते विवेकविज्ञानेन उज्ज्वलभावम् आपादिते प्रविलापयन्ति इत्यर्थः।

"अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।

प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥ "

अत्र वदति प्राणापानव्यानोदानसमानाख्याः पञ्चप्राणेषु अपाने अपानवृत्तौ जुह्वति प्रक्षिपन्ति प्राण प्राणवृत्तिं पूरकाख्यं प्राणायामं कुर्वन्ति इत्यर्थः । प्राणे अपानं तथा अपरे जुह्वति रेचकाख्यं च प्राणायामं कुर्वन्ति इति एतत् । प्राणापानगती मुखनासिकाभ्यां वायोः निर्गमनं प्राणस्य गतिः

तद्विपर्ययेण अधोगमनम् अपानस्य ते प्राणापानगती एते रुद्ध्वा निरुध्य प्राणायामतत्पराः कुम्भकाख्यं प्राणायामं कुर्वन्ति इति।

" एवं बहुविधा यज्ञा वितता ब्रह्मणी मुखे

कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ "

एवं बहुप्रकारा यज्ञाः विस्तीर्णतया विशदीक्रियते ब्रह्मणः अथवा वेदस्य मुखे । "वेदद्वारेण अवगम्यमाना ब्रह्मणो मुखे वितता उच्यन्ते तद्यथा 'वाचिहि प्राणं जुहुम ' " इत्यादयः । कायिकवाचिकमानस कर्मोद्भवान् तान् सर्वान् अनात्मजान् विद्धि। निर्व्यापारो हि आत्मा।

अत एवं ज्ञात्वा अशुभात् विमोक्ष्यसे। न मद्व्यापारा इमे निर्व्यापारः अहम् उदासीन इति एवं ज्ञात्वा अस्मात् सम्यग्दर्शनाद् संसारबन्धनाद् मोक्ष्यसे इत्यर्थः । एवं प्रकारेण अन्यासु उपनिषत्सु अपि प्राणस्य विचारः द्रष्टुं शक्यते। तासां उपनिषदां तात्पर्यं तु प्राणज्ञानद्वारा ब्रह्मप्राप्तिरेव।

यथा तैत्तिरीये -

" प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति। प्राणं प्रयन्त्यभिसंविशन्तीति । " इत्यत्र प्राणैव ब्रह्मेति रूपेण वदति । अतः प्राणज्ञानेन ब्राह्मप्राप्तिरिति।

छान्दोग्योपनिषदि -

" पुरुषस्य प्रयतो वाङ्मनसि संपद्यते

मनः पाणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥ "

इति उत्तरोत्तरप्राधान्यत्वेन ब्रह्मणि प्रविलापनं च वदन्ति। एताः श्रुतयः प्राणं पुरस्कृत्य सामान्यतया परब्रह्मविषयतां निरूपयन्ति । किन्तु अत्र कौषीतकिब्राह्माणोपनिषदि प्राणस्य विशदविशिष्ट चिन्तना दृश्यते।

" प्राणो ब्रह्मेति। " "एतस्मै प्राणाय ब्रह्मणे एताः सर्वा देवता अयाचमानाय बलिं हरन्ति तथो एवास्मै सर्वाणि भूतानि अयाचमानैव बलिं हरन्ति । " " य एवं वेद तस्योपनिषन्न याचेदिति । " इति प्राणोपासकस्य श्रेष्ठतां उक्त्वा तत्र प्राणविद्यायाः महत्वं प्रस्तौति। " यः प्राणं ब्रह्म मन्यते तस्मै अयाचमानैव सर्वाणि भूतानि बलिं हरन्ति। " इति श्रुतिः प्राणोपासनायाः सर्वात्मतां निरूपयन्ति। "

एष सर्वस्यै त्रयी विद्यायाः आत्मैव उ एवास्यात्मा एतदात्मा भवति य एवं वेद। " इत्युक्त्वा प्राणस्य विभुत्वमपि प्रदर्शयति।

" सर्वेषां भूतानां प्राणमेव प्रज्ञां " इति प्राणस्य महत्वं प्रदर्शयति।

तत्र प्राणोपासनानि त्रीणि निर्दिष्टानि च

- जपप्रधानानि
- अदित्यचन्द्रोपासनात्मकानि
- पुत्रायुप्रार्थनात्मकं चेति।

एतासां उपासनानां फलत्वेन शत्रुद्वेषादि निवारण फलकं निःश्रेयसप्रदानकं च लौकिकालौकिकफलचिन्तनमपि निरूपयन्ति । उपनिषदि अग्निहोत्रप्रधानत्वेनापि प्राणोपासना रूपाणि निर्दिशन्ति , एवमेता उपासनाः लौकिकफलसाधिकाः सन्त्योऽपि परमप्रयोजनसाधनोपासनासोपानरूपेण निर्दिष्टा।

प्रबन्धसंग्रहः।

कौषीतकिब्राह्मणोपनिषदि प्राणस्य विशदविशिष्टविचिन्तनेन प्राणस्य त्रीण्युपासनानि जाताजातपुत्रक्षेमसाधकानि , जपप्रधानानि निरूपितानि आदित्यचन्द्रोपासनात्मकानि । उपनिषदि द्वितीयाध्यायस्य अन्तिमे भागे पिता तस्य अन्तिमकाले पुत्रं आहूय स्वस्य प्राणशक्तिं तस्मिन् प्रतिष्ठां करोति। एतदेव सम्प्रदानाख्यं उपासनम्। प्राणस्य विविधोपासनादिषु महत्व प्रतिपादनमेव ?' ध्याध्यायस्य विषयः इति वक्तुं शक्नोति । यतो उपनिषदः तात्पर्यं अद्वैतमेव ततोऽपि तत्र एकत्वेन मनसः प्राणस्य तथा इन्द्रियाणामपि कल्पना द्रष्टुं शक्यते।

" एको देव सर्व भूतेषु " इति अद्वैतमतम्। अत्रापि प्राणं ब्रह्मैव मत्वा सर्वफलप्रदातृभगवदुपासनाः साक्षाद् ब्रह्मविद्याः , प्राणाद्युपाधिकब्रह्मोपासनाः अभ्युदयिकफलप्रदाः विद्याः निरूपयन्ति । प्राणस्य विचारः वयं करणीयमेव। उपनिषदि अग्निहोत्रप्रधानत्वेनापि प्राणोपासना रूपाणि निर्दिशन्ति । किन्तु लौकिकानां कृते एषा ब्रह्मविद्यापरः नास्ति । अतः उपनिषदामाधारेण प्राणोपासनायाः निरूपणं अन्तःकरणशुद्धिद्वारा ब्रह्मविद्यायोग्यतां साधयति इति पठनस्यास्य उपयोगित्वम् ।

योगादि दर्शनेषु प्राणायामप्रकाराः वर्णयन्ति। मनसः नियन्त्रणे , सत्वशुद्धिप्राप्तये , दुःखनिवारणे च प्राणानां नियन्त्रणमवश्यंभावी । अतः अध्ययनेनानेन प्राणस्य महत्वं लोकान् बोधयितुं , स्वजीवने अनुशीलयितुं च शोधविषयेऽस्मिन् मे प्रयत्नः । अत्र निरूपिताः विद्याः गुप्ताऽपि लोकोपकाराय भवन्ति। मुक्तिकामानां आत्मावबोधनाय सर्वस्य हितरूपेण कृतं इयं विद्या तेषां स्वचित्तप्रक्षालनाय साहाय्यं भवति

## ग्रन्थसूची


- Unni,N P,108 Upanishad,Prasanthy Publishers,2006
- Aravindaksha Pisharati,EP,Samkhyakarika(Malayalam),SriRamakrishna Math,2000
- Goyantka,Harikrishnadas,Gita Sankarabhasya Hindi anuvak sahit,Gitapress
- Chandrika,B,Vedanta Kaumudi,Nalanda Publishers,2006
- En.m.wikipedia.org